वयं सर्व्वे न जानीमो विधानं कीदृशं क्रतोः ॥
इति तेषां वचः श्रुत्वा चिन्तायुक्तो महीपतिः ।
किं करोमि क्व गच्छामि विललाप पुनः पुनः ॥
कान्यकुब्जात् समानीतान् दूतेन द्विजपञ्चकान् ।
वेदशास्त्रेष्ववगतान् सर्व्वास्त्रे च विशारदान् ॥
गोयानारोहितान् विप्रान् खड्गचर्म्मादिभिर्युतान् ।
पत्तिवेशान् समालोक्य विषादो जायते हृदि ॥
अश्रद्धा जायते राज्ञ इति ज्ञात्वा द्विजोत्तमाः ।
आशीर्व्वादार्थनिर्म्माल्यं मल्लकाष्ठोपरि स्थितम् ॥
तदा काष्ठं सजीवं स्यात् फलपल्लवसंयुतम् ।
इति दृष्ट्वा नृपस्तस्मिन् कम्पान्वितकलेवरः ॥
स्तोत्रञ्च बहुधा तेषामकरोत् स नृपोत्तमः ।
आसनं पाद्यमानीय ददौ विनयपूर्व्वकम् ।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ॥
राजंस्ते कुशलं सर्व्वं प्रोचुस्तेत्यवदत् स तान् ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
पूतञ्च भवनं जातं युष्माकं गमनं यतः ।
एवञ्च क्रियते स्तोत्रं दृष्ट्वान्यत् शूद्रपञ्चके ॥
युष्माकं गोत्रमाख्या च किमर्थं वा द्विजैः सह ।
तत् सर्व्वं श्रोतुमिच्छामि ब्रूत भोः शूद्रपुङ्गवाः ॥
इति राज्ञो वचः श्रुत्वा कथयन् नामगोत्रके ।
काश्यपे चैव गोत्रे च दक्षनामा महामतिः ॥
तस्य दासो गौतमस्य गोत्रे दशरथो वसुः ।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः कृती ॥
सौकालिनस्य दासोऽयं घोषः श्रीमकरन्दकः ।
भरद्वाजेषु विख्यातः श्रीहर्षो मुनिसत्तमः ॥
दासस्तस्य विराटाख्यो गुहकः काश्यपः स्मृतः ।
सावर्णगोत्रनिर्द्दिष्टो वेदगर्भमुनिस्त्वयम् ॥
तस्य दासो मित्रवंशो विश्वामित्रस्य गोत्रकः ।
कालिदास इति ख्यातः शूद्रवंशसमुद्भवः ॥
वात्स्यगोत्रेषु सम्भूतश्छान्दड़स्तेति संज्ञितः ।
मौद्गल्यगोत्रजो दत्तः पुरुषोत्तमसंज्ञकः ॥
एतेषां रक्षणार्थाय आगतोऽस्मि तवालये ।
इति श्रुत्वा नृपस्तत्र मनसा हर्षमागतः ॥
विधानेनैव निर्व्वर्त्त्य क्रतुञ्च धर्म्मसंज्ञितम् ।
ग्रामं सवर्णं गाश्चैव वस्त्राणि विविधानि च ॥
दक्षिणार्थे द्विजातिभ्यः प्रददौ स नृपोत्तमः ।
अत्र देशे कृतावासाः सर्व्वे च द्विजशूद्रकाः ॥
बहवश्च प्रजा जाता नानादेशनिवासिनः” ॥ * ॥

अथ वल्लालकृतश्रेणिविभागः ।

“अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः ।
कुरुतेऽतिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरानीतविप्रान् शूद्रांश्चैव तथापरान् ।
एतेषां सन्ततीः सर्व्वा आनयत् स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र ग्रामे निरोपिताः ।
श्रेणीद्वयन्तु निर्णीतं राढ़ीवारेन्द्रसंज्ञितम् ॥
तथैव द्विविधं प्रोक्तं कुलञ्च सद्द्विजोत्तमे ।
शूद्रस्याथ चतस्रश्च नृपेण श्रेणयः कृताः ॥
उदग्दक्षिणराढ़ौ च वङ्गवारेन्द्रकौ तथा ।
इति चतस्रः संज्ञाः स्युस्तत्तद्देशनिवासनात् ॥
कुलं चतुर्व्विधं तेषां श्रेणीश्रेणीविशेषतः” ॥ * ॥

अथ वङ्गजकायस्थश्रेणिनिर्णयः ।

“तत्र वङ्गेषु यैः शूद्रैर्निवासः क्रियतेऽधुना ।
तेषां निर्णयमाचक्षे कुलञ्चैव विशेषतः ॥
वसुवंशे च मुख्यौ द्वौ नाम्ना लक्षणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥
गुहे दशरथश्चैव मित्रे तारापतिस्तथा ।
दत्ते नारायणश्चैव एते च वङ्गजाः स्मृताः” ॥

अपरन्तु ।

“नागे दशरथश्चैव महानन्दस्तु नायकः ।
चन्द्रशेखरदासस्तु सेने गङ्गाधरस्तथा ॥
दामोदरकरः ख्यातो दामस्तूषापतिस्तथा ।
पालिते जनसंज्ञः स्यात् चन्द्रे नारायणाख्यकः ॥
पाले आवः समाख्यातो राहावंशे च कृष्णकः ।
भद्रे दिगम्बरश्चैव धरे तु व्याससंज्ञकः ।
प्रभाकरस्तु नन्दी स्यात् केशवो देववंशजः ।
अवीपतिरिति ख्यातः कुण्डवंशे प्रकीर्त्तितः ॥
सोमे वंशधरश्चैव सिंहे रत्नाकरस्तथा ।
नारायणः समाख्यातो रक्षिते च तथापरे ॥
वेदगर्भाङ्कुरश्चैव दैत्यारिर्विष्णुसंज्ञकः ।
आढ्ये त्रिलोचनः ख्यातो नन्दने च उषापतिः ॥
एते वङ्गजनिर्द्दिष्टा वल्लालेन महात्मना ।
अन्येऽपि शूद्रा विख्यातास्तत्र देशनिवासिनः ॥
ते वङ्गजाः समाख्याताः करणेषु प्रतिष्ठिताः” ॥ * ॥

अथ वङ्गजकुलीनादिनिरूपणम् ।

“कुलीन इति संज्ञा स्यात् मध्यन्यश्च तथापरः ।
महापात्रोऽचलश्चैव इति संज्ञाचतुष्टयम्” ॥

तद्यथा ।

“वसुर्घोषो गुहो मित्रो दत्तो नागश्च नायकः ।
दासः सेनः करो दामः पालितश्चन्द्रपालकौ ॥
राहो भद्रो धरो नन्दी देवः कुण्डश्च सोमकः ।
रक्षिताङ्कुरसिंहाश्च विष्णुराढ्यश्च नन्दनः ॥
चत्वारोऽग्र्यास्त्रयो मध्या महापात्राः परे तथा ।
सप्तविंशतिः शूद्राणां वल्लालेन प्रशंसिताः” ॥ * ॥
इति कुलीनमध्यन्यमहापात्राः । अचलान् वक्ष्यामि ।

“होड़श्च आरकश्चैव धरणीवान एव च ।
आइचः पैसुरश्चैव शानश्च मल्लविन्दुकौ ॥
गुहश्च वललोधौ च शर्म्मा वर्म्मा च भूमिकः ।
ऊइश्च रुद्रकश्चैव राणादित्यौ च पीलकः ॥
खिलश्च गुप्तचाञ्जी च बन्धुश्च शाञ्जिसंज्ञकः ।
हेशश्च सुमगुर्गड्डो राणाराऊतदाहकाः ॥
दानागणापनानाख्याः खामः क्षेमश्च तोषकः ।
वैश्यापि घरवेदौ च भूतार्णवकब्रह्मकाः ॥
एन्दश्च शक्तिसङ्गौ च क्षेमाशौ वर्द्धनस्तथा ।
हेमश्च बन्धकश्चैव भूञ्जिः कीर्त्तिश्च शीलकः ॥
धनुर्गुणो यशश्चैव मनोरीतिश्च दाड़िकः ।
चाकिश्च श्याम पूञ्जिश्च गण्डको नादकस्तथा ॥
रोइश्च होमकश्चैव चाशकश्च तथैव च ।
ढोलश्च दूतकश्चेति द्विसप्तत्यचलाः स्मृताः” ॥
एतेषां प्रतिपुरुषक्रमेण कुलार्च्चनात् महापात्रभावो जायते ॥ * ॥ इति वङ्गजघटकरामानन्दशर्म्मकृतकुलदीपिका ॥

कायस्था, स्त्री, (कायस्तिष्ठत्यनया । काय + स्था + घञर्थे कः ।) हरीतकी । इति मेदिनी ॥ धात्रीवृक्षः । इति जटाधरः ॥ काकोली । इत्यमरटीकायां भरतः ॥ एलाद्वयम् । तुलसी । इति राजनिर्घण्टः ॥ कायस्थस्त्रीजातिः । कायस्थपत्न्यां कायस्थी ॥

कायिकः, त्रि, (कायेन निष्पादितः निष्पन्नो वा कायेन निर्वृत्त इति वा । काय + ठक् ।) शारीरिकः । कायनिष्पन्नः । यथा ।
“अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्” ॥
इति तिथ्यादितत्त्वम् ॥ (स्त्री, शरीरसम्बन्धिनी चक्रवृद्धिः । यथा मनुः ८ । १५३ ।
“चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या” ॥)

कायिकावृद्धिः, स्त्री, (गोबलीवर्द्दादीनां कायपरिश्रमसाध्या या वृद्धिः ।) गवादिवलीवर्द्दादिकर्म्मयुता वृद्धिः । यथा ।
“दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता” ।
इति व्यासः ॥ मूलधनाविरोधिनी प्रत्यब्ददेयपणतदर्द्धादिरूपा वृद्धिः । यथा ।
‘कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका” ।
इति नारदः ॥ हलायुधस्तु पणार्द्धाद्या इत्यत्र पणवाह्येति पठित्वा पणस्य मूलधनस्य यावदवस्थानं तावत् शश्वत् वर्षसहस्रमपि उत्तमर्णेन या वाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् तत्राद्या भोगलाभान्तर्गता अपरा च तद्भिन्ना इति मिश्राः । इति विवादार्णवसेतुः ॥

कारः, पुं, (कृ हिंसायां + भावे घञ् ।) वधः । निश्चयः । (धातूनामनेकार्थत्वात् अत्र निश्चयार्थेऽपि ॥ कं सुखं ऋच्छत्यनेन । क + ऋ + करणे + घञ् ।) बलिः । यत्नः । यतिः । (कं सुखं निर्वृतिं ऋच्छतीति । क + ऋ + कर्त्तरि अण् ।) पतिः । इति शब्दरत्नावली ॥ (कं निष्यन्दजलमृच्छतीति ।) तुषारशैलः । इति मेदिनीकरहेमचन्द्रौ ॥ कर्म्मोपपदे कर्तृवाचकः । यथा कर्म्मकारः स्वर्णकार इत्यादि । इति व्याकरणम् ॥ क्रिया । यथा करणं कारः क्रिया । इति रामतर्कवागीशः ॥ (अक्षरान्ते तदक्षरवाचकः । यथा ककारः । मकारः । इत्यादिः ॥)

कारकं, क्ली, (क्रियाभिरन्वितं इति । भाष्यमते तु करोति क्रियां निर्व्वर्त्तयतीति । कृ + कर्त्तरि ण्वुल् ।) क्रियानिमित्तं लोकतः सिद्धम् । इति दुर्गसिंहः ॥ फणिभाष्यमते पुं, यथा भवितुः स प्रयोजकः कारकः । तत्तु षड्विधम् । कर्म्म १ यथा रामं नमति । करणम् २ यथा नेत्रैः शिवो दृष्टः । कर्त्ता ३ यथा जनैः शिवो दृष्टः । सम्प्रदानम् ४ यथा हरिः सद्भ्यः सुखं ददातु । अपादानम् ५ यथा विभीषणः पदाद्भ्रष्टः । अधिकरणम् ६ यथा रेमे शरदि गोविन्दः । इति वोपदेवः ॥ वर्षोपलोद्भवं जलम् । इति राजनिर्घण्टः ॥

कारकः, त्रि, (करोति कर्म्मादिकम् । कृ + “ण्वुल्तृचौ” । ३ । १ । १३३ । इति ण्वुल् ।) कर्त्ता । इति मेदिनी ॥ (यथा मनुः ७ । २०४ ।
“आदानमप्रियकरं दानञ्च प्रियकारकम्” ॥)

कारकुक्षीयः, पुं, (कारकुक्षि + छः ।) शाल्वदेशः ।